# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.2.3.5** | समयः- 8 तः 11पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधस्तनश्लोकेषु द्वयोः व्याख्यानं विधेयम्।** १०

१ सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते।

२ यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥

३ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माः च शाश्वताः॥

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ पाण्डवसेनायाः वर्णनं विधाय विषीदन्नर्जुनः किमब्रवीत् विस्तरेण प्रतिपादयत ।

२ प्रथमाध्यायस्य साराशं सविशदं लिखत ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनश्लोकेषु द्वयोः व्याख्यानं विधेयम्।** १०

१ नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥

२ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

३ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत ।** १०

१ देहानां विनाशित्वं प्रतिपाद्य देहिनामविनाशित्वं संसाधयत।

२ ज्ञाननिष्ठायाः दुर्लभतां प्रतिपाद्य तत्प्राप्त्युपायं प्रतिपादयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनश्लोकेषु द्वयोः व्याख्यानं विधेयम्।** १०

१ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव॥

२ तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः॥

३ धूमेनाव्रियते वह्निः यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भः तथा तेनेदमावृतम्।।

**प्रश्न ६ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ ज्ञानयोगकर्मयोगयोरन्तरं यथाग्रन्थं विशदयत।

२ आत्मनः अकर्तृत्वानुसन्धानप्रकारं सविशदं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** १०

१ भीष्मः पितामहः कस्य हृदये हर्षं जनयितुं सिंहनादं शंखाध्मानं कृतवान्?

२ राजा युधिष्ठिरः कं शंखं प्रदध्मौ?

३ पाण्डवानां बलं भीष्माभिरक्षितमासीत् वा भीमाभिरक्षितमासीत्?

४ युयुत्सुं समुपस्थितं स्वजनं दृष्ट्वा को विषण्णः अभवत्?

५ अर्जुनविषादयोगः कस्मिन् अध्याये वर्णितः?

६ आत्मा नित्यो वानित्यः?

७ विनाशित्वं केषां स्वभावः?

८ कः न जायते?

९ जीर्णानि शरीराणि विहाय नवानि शरीराणि कः प्राप्नोति?

१० द्वितीयाध्याये कति श्लोकाः सन्ति?

११ निष्ठा कतिविधा? का च सा?

१२ गुणाः कतिविधा? के च ते?

१३ स्वधर्मे किं श्रेयः?

१४ इन्द्रियेभ्यः परं किम्?

१५ तृतीयाध्यायस्य नाम किम्?